devImAhAtmyastotram

# देवीमाहात्म्यस्तोत्रम् अथवा दुर्गास्तोत्रम्

## Document Information

Text title : devImAhAtmyastotram

File name : devImAhAtmyastotram.itx

Category : devii, durgA, stotra, devI, mAhAtmya

Location : doc_devii

Transliterated by : KSR Ramachandran

Proofread by : KSR Ramachandran

Latest update : December 7, 2013, October 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# देवीमाहात्म्यस्तोत्रम् अथवा दुर्गास्तोत्रम्

(श्रीदुर्गासप्तशतीस्तोत्रम्) (आपदुन्मूलनदुर्गास्तोत्रम्)
लक्ष्मीशे योगनिद्रां प्रभजति भुजगाधीशतल्पे सदर्पौ
उत्पन्नौ दानवौ तच्छ्रवणमलमयाङ्गौ मधुं कैटभं च ।
दृष्ट्वा भीतस्य धातुः स्तुतिभिरभिनुतां आशु तौ नाशयन्तीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ १॥

युद्धे निर्जित्य दैत्यस्त्रिभुवनमखिलं यस्तदीयेषु धिष्ण्ये-
ष्वास्थाय स्वान् विधेयान् स्वयमगमदसौ शक्रतां विक्रमेण ।
तं सामात्याप्तमित्रं महिषमपि निहत्यास्य मूर्धाधिरूढां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ २॥

विश्वोत्पत्ति-प्रणाश-स्थिति-विहृति-परे देवि घोरामरारि-
त्रासात् त्रातं कुलं नः पुनरपि च महासङ्कटेष्वीदृशेषु।
आविर्भूयाः पुरस्तादिति चरण-नमत्-सर्व-गीर्वाण-वर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ३॥

हन्तुं शुम्भं निशुम्भं त्रिदश-गण-नुतां हेमडोलां हिमाद्रौ
आरूढां व्यूढदर्पान् युधि निहतवतीं धूम्रदृक्-चण्ड-मुण्डान् ।
चामुण्डाख्यां दधानां उपशमित-महा-रक्तबीजोपसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ४॥

ब्रह्मेश-स्कन्द-नारायण-किटि-नरसिंहेन्द्र-शक्तीः स्वभृत्याः
कृत्वा हत्वा निशुम्भं जित-विबुध-गणं त्रासिताशेषलोकम् ।
एकीभूयाथ शुम्भं रणशिरसि निहत्यास्थितां आत्तखड्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ५॥

उत्पन्ना नन्दजेति स्वयमवनितले शुम्भमन्यं निशुम्भं
भ्रामर्याख्यारुणाख्यं पुनरपि जननी दुर्गमाख्यं निहन्तुम् ।
भीमा शाकम्भरीति त्रुटित-रिपुभटां रक्तदन्तेति जातां

दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ६॥

त्रैगुण्यानां गुणानां अनुसरण-कला-केलि-नानावतारैः
त्रैलोक्य-त्राण-शीलां दनुज-कुल-वनी-वह्नि-लीलां सलीलाम् ।
देवीं सच्चिन्मयीं तां वितरित-विनमत्-सत्रिवर्गापवर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ७॥

सिंहारूढां त्रिनेत्रां करतल-विलसच्छङ्ख-चक्रासि-रम्यां
भक्ताभीष्टप्रदात्रीं रिपुमथनकरीं सर्वलोकैकवन्द्याम् ।
सर्वालङ्कारयुक्तां शशियुतमकुटां श्यामलाङ्गीं कृशाङ्गीं
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ८॥

त्रायस्व स्वामिनीति त्रिभुवनजननि प्रार्थना त्वय्यपार्था
पाल्यन्तेऽभ्यर्थनायां भगवति शिशवः किन्त्वनन्या जनन्याः ।
तत्तुभ्यं स्यान्नमस्येत्यवनत-विबुधाह्लादि-वीक्षा-विसर्गां
दुर्गां देवीं प्रपद्ये शरणमहमशेषापदुन्मूलनाय ॥ ९॥

एतं सन्तः पठन्तु स्तवमखिल-विपज्जालतूलानलाभं
हृन्मोहध्वान्त-भानु-प्रथितमखिल-सङ्कल्प-कल्पद्रु-कल्पम् ।
दौर्गं दौर्गत्य-घोरातप-तुहिनकर-प्रख्यमंहो-गजेन्द्र-
श्रेणी-पञ्चास्य-देश्यं विपुलभयद-कालाहि-तार्क्ष्य-प्रभावम् ॥ १०॥

दुर्गां देवीं शरणमहम् प्रपद्ये ॥

इति देवीमाहात्म्यस्तोत्रम् अथवा दुर्गास्तोत्रम् अथवा श्रीदुर्गासप्तशतीस्तोत्रं सम्पूर्णम् ।
आपदुन्मूलनदुर्गास्तोत्रम् च

Encoded and proofread by KSR Ramachadran
This stotram is given as an appendix to a commentary on Devimahatmyam by my Guru (spiritual preceptor) the late Sri 'Anna' N Subramania Iyer, published by The Ramakrishna Math, Myalpore, Madras PIN 600004, India , sixth edition, 1986 ( VI- 3M3C-6-1986), No mention has been made there as to the source or author of this stotram.

However, in the preface to the second edition of this book, Sri Anna had mentioned this work alongside saptashatI yantra pUjanam, vArShika chaNDIvidhAnam , durgA chandrakalA stuti, and mahiShAsura mardinI stotram, so I think it as old as the others.

---

*devImAhAtmyastotram*
pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*